वलात्मस्थाने नलात्म इति सर्व्वाङ्गस्थाने सर्व्वाग इति वा पाठः ।
चेत्रपालो महाक्षोभो मात्टकान्तानलच्चयः ।
सुखं कथवहानन्ता कालभिक्षा गणेश्वरः ।
छायापुत्रश्च संघातो मलयः श्रीर्ललाटकः ॥"च:॥
इति नन्दनभट्टाचार्य्यविरचितं वर्णाभिधानं समाप्तम् ॥

वर्णकं, क्ली, (वर्णयतीति । वर्ण + ण्वुल् ।) हरितालम् । इति रत्नमाला ॥ गात्रानुलेपनयोग्यं पिष्टं घृष्टं वा सुगन्धिद्रव्यम् । इत्यमरः ॥ चन्दनम् । इति शब्दरत्नावली ॥

वर्णकः, पुं, क्ली, (वर्ण + स्वार्थे संज्ञायां वा कन् ।) विलेपनम् । चन्दनम् । इति मेदिनी । के, १५२ ॥ (यथा, महाभारते । १३ ।१११।१०७ ।
"वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानवः ।
छुछुन्दरित्वमाप्नोति राजन् ! लोभपरायणः ॥")

वर्णकः, पुं, स्त्री, (वर्ण्यते रज्यतेऽनेनेति । वर्ण + घञ् । स्वार्थे कन् ।) हिङ्गुलहरितालकाचनीलीकादिः । इत्यमरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् । १८६ ।
"कस्तां निन्दति लुम्पति कः स्मरफलकस्य वर्णकं मुग्धः ।
को भवति रत्नकण्टकमन्तरे कस्यारुचिरदेति ॥")

वर्णकः, पुं, (वर्णयति नृत्यादीन् विस्तारयतीति । वर्ण + ण्वुल् ।) चारणः । इति मेदिनी । के, ५२ । मण्डलम् । इति शब्दरत्नावली ॥

वर्णकविः, पुं, कुवेरपुत्रः । इति त्रिकाण्डशेषः ॥

वर्णकूपिका, स्त्री, (वर्णानां कूपिकेव ।) मस्याधारः । यथा,—
"मसीधानी मसिमणिर्मेलान्धुर्वर्णकूपिका ॥"
इति त्रिकाण्डशेषः ॥

वर्णचारकः, त्रि, (वर्णान् नीलादीन् चारयति विस्तारयतीति । चर + णिच् + ण्वुल् ।) चित्रकारः । इति शब्दमाला ॥

वर्णज्येष्ठः, पुं, (वर्णेषु चतुर्षु मध्ये ज्येष्ठः प्रथमोत्पन्नात् गुणोत्कृष्टत्वाच्च ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

वर्णज्येष्ठः, त्रि, (वर्णेन ज्योतिषोक्तपारिभाषिकवर्णेन ज्येष्ठः श्रेष्ठः ।) स्ववर्णापेक्षोत्तमवर्णः । पारिभाषिकहीनवर्णकर्तृकपारिभाषिकवर्णज्येष्ठकन्याविवाहनिषेधो यथा,—
"मीनकर्कटवृश्चिकविप्राः
सिंहतुलाधनुः क्षत्त्रिय उक्तः ।
कुम्भनरद्वयमेषविशः स्यु-
र्मकरवृषकौ कथितावरजातिः ॥
वर्णज्येष्ठा च या नारी वर्णहीनश्च यः पुमान् ।
तयोर्विवाहे म्टत्युः स्यात् वत्सरासान्नात्र संशयः ॥"
इति ज्योतिस्तत्त्वे वर्णशोधनम् ॥

वर्णतूलिः, स्त्री, (वर्णानां तूलिरिव ।) लेखनी । इति शब्दरत्नावली ॥

वर्णतूलिका, स्त्री, (वर्णानां तूलिकेव ।) लेखनी । इति हारावली । २१२ ॥

वर्णतूली, स्त्री, (वर्णानां तूलीव ।) लेखनी । इति त्रिकाण्डशेषः ॥

वर्णदं, क्ली, (वर्णं ददातीति । दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कालीयकम् । इति जटाधरः ॥ वर्णदातरि, त्रि ॥

वर्णदात्री, स्त्री, (वर्णं ददातीति । दा + तृच् + ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वर्णदातरि, त्रि ॥

वर्णदूतः, पुं, (वर्णा एव दूता यत्र ।) लिपिः । तत्पर्य्यायः । लेखः २ वाचिकहारकः ३ स्वस्तिमुखः ४ । इति त्रिकाण्डशेषः ॥

वर्णधर्म्मः, पुं,स्त्री, (वर्णानां ब्राह्मणादीनां धर्म्मः ।) ब्राह्मणक्षत्त्रियवैश्यशूद्राणां कर्त्तव्यं कर्म्म । तद्यथा, —
"यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट्कर्म्माणि द्विजोत्तमाः ॥
दानमध्ययनं यज्ञो धर्म्मः क्षत्त्रियवैश्ययोः ।
दण्डो युद्धं क्षत्त्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् ।
कारुकर्म्म तथाजीवः पाकयज्ञोऽपि धर्म्मतः ॥
क्षमा दमो दया दानमलोभस्त्याग एव च ।
आर्ज्जवं चानसूया च तीर्थानुसरणं तथा ॥
सत्यं सन्तोष आस्तिक्यं श्रद्धा चेन्द्रियनिग्रहः ।
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ॥
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता ।
समासिकमिमं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनुः ॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्त्रियाणां संग्रामेष्वपलायिनाम् ॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम् ।
गान्धर्व्वं शूद्रजातीनां परिचारे तु वर्त्तताम् ॥"
इति कौर्म्मे २ अध्यायः ॥*॥
अपि च ।
मार्कण्डेय उवाच ।
"हारीतस्त्वनुवाचाथ तैरेवं चोदितो मुनिः ।
शृण्वन्तु मुनयः सर्व्वे धर्म्मान् वक्ष्यामि शाश्वतान् ॥
वर्णानामाश्रमाणाञ्च योगशास्त्रञ्च सत्तमाः ।
यज्ज्ञात्वा मुनयो नित्यं मुच्यते जन्मबन्धनात् ॥
ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मणः स्मृतः ।
तस्य धर्म्मं प्रवक्ष्यामि तं योग्यं देशमेव च ॥
कृष्णसारो मृगो यत्र स्वभावात्तु प्रवर्त्तते ।
तस्मिन् देशे वसन् धर्म्मं कुरुते ब्राह्मणोत्तमः ॥
अध्यापनं चाध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव कर्म्मषट्कमिहोच्यते ॥
अध्यापनञ्च त्रिविधं धर्म्मार्थं चात्मकारणम् ।
शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितम् ॥
एषामन्यतमो वापि दृश्यते यत्र मानवे ।
तत्र विद्या न दातव्या पुरुषेण हितैषिणा ॥
योग्यानध्यापयेच्छिष्यान् यज्ञानपि च याजयेत् ।
विहितान् प्रतिग्रहानिच्छेद्गृहधर्म्मप्रसिद्धये ॥
वेदमेवाभ्यसेन्नित्यं शुचौ देशे समाहितः ।
यजेद्यज्ञं यथाशक्त्या दद्याद्वित्तानुसारतः ॥
नित्यं नैमित्तिकं धर्म्मं कर्म्म कुर्य्यात् प्रयत्नतः ।
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रितः ॥
सायं प्रातरुपासीत विधिनाग्निं द्विजोत्तमः ।
कृतस्नानः प्रकुर्व्वीत वैश्वदेवं दिने दिने ॥
अतिथिञ्चागतं भक्त्या पूजयेच्छक्तितो गृही ।
अन्यानभ्यागतान् विप्रान् पूजयेदविरोधतः ॥
स्वदारनिरतो नित्यं परदारविवर्ज्जितः ।
सत्यवादी जितक्रोधः स्वधर्म्मनिरतो भवेत् ॥
अकर्म्मणि च संप्राप्ते प्रमादे नैव रोचयेत् ।
प्रियां हितां वदेद्वाचं परलोकाविरोधिनीम्
एष धर्म्मः समुद्दिष्टो ब्राह्मणस्य समासतः ।
धर्म्ममेवन्तु यः कुर्य्यात् स याति ब्रह्मणः परम्
हारीत उवाच ।
क्षत्रादीनां प्रवक्ष्यामि यथावदनुपूर्व्वशः ।
येन येन प्रवर्त्तन्ते विधिना क्षत्त्रियादयः ॥
राजा च क्षत्त्रियश्चैव प्रजा धर्म्मेण पालयेत् ।
कुर्य्यादध्ययनं सम्यक् युगयुक्तो यथाविधि ॥
दद्याद्दानं द्विजाग्रेभ्यो धर्म्मबुद्धिसमन्वितः ।
देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा ॥
धर्म्मेण वै जयाकाङ्क्षी अधर्म्मस्य विवर्ज्जयेत् ।
उत्तमां गतिमाप्नोति क्षत्त्रियो ह्येवमाचरन् ॥*॥
गोरक्षं कृषिवाणिज्यं कुर्य्याद्वैश्यो यथाविधि ।
दानं धर्म्मं यथाशक्त्या द्विजशुश्रूषणं तथा ॥
लोभदम्भविनिर्म्मुक्तः सत्यवागनसूयकः ।
स्वदारनिरतो दान्तः परदारविवर्ज्जितः ॥
धनैर्विप्रान् समभ्यर्च्य यज्ञकाले त्वयाचितः ।
अप्रमत्तः स्वधर्म्मेषु वर्त्तेत देहपातनात् ॥
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रितः ।
पितृकार्य्यञ्च तत्काले नारसिंहार्च्चनं तथा ॥
एतद्वैश्यस्य कर्म्मोक्तं स्वधर्म्ममनुतिष्ठतः ।
एतदासेवमानस्तु मुक्तः स्यान्नात्र संशयः ॥*॥
वर्णत्रयस्य शुश्रूषां कुर्य्यात् शूद्रः प्रयत्नतः ।
दासवत् ब्राह्मणानान्तु विशेषेण समाचरेत् ॥
अयाचितः प्रदाता स्यात् कृषिं वृत्त्यर्थमाश्रयेत् ।
पाकयज्ञविधानेन यजेद्देवानतन्द्रितः ॥
शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम् ।
धारणं जीर्णवस्त्रस्य विप्रस्योच्छिष्टभोजनम् ॥
स्वदारेषु रतिश्चैव परदारविवर्ज्जितः ।
पुराणश्रवणं विप्रान्नारसिंहस्य पूजनम् ॥
तथा विप्रनमस्कारस्तथा मन्त्रं दिने दिने ।
सत्यं सम्भाषणं चैव रागद्वेषविवर्ज्जनम् ॥
इत्थं कुर्व्वंस्तथा शूद्रो मनोवाक्कायकर्म्मभिः ।
स्थानमैन्द्रमवाप्नोति नष्टपापः प्रपुण्यकृत् ॥"
इति नारसिंहे ५३ ।५४ अध्यायौ ॥ * ॥
अन्यच्च ।
महादेव उवाच ।
"दानमध्ययनं यज्ञो ब्राह्मणस्य विधीयते ।
धर्म्मो नान्यश्चतुर्थोऽस्ति धर्म्मस्तस्यापरं विना ॥
याजनाध्यापने यज्ञस्तथा पुण्य प्रतिग्रहः ।